नं: २३-घ

सारस्वतटीका

पत्राणि २०

© Dharmartha Trust J&K. Digitized by eGangotri

नं: २३-घ

पत्राणि २०

सारस्वतटीका
पुंजराजकृता

२३

२० पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

अथ हसान्ताः हसान्तपुंलिंगकथनानन्तर्यं अत्र गोदुहप्रभृतयो वाच्यलिंगाः पुंलिंगवत् साध्याः उपानह्शब्दं द
र्शयति नहो धः नहो धः नहो हकारस्य धकारादेशो भवति धातोर्झसे परे नाम्नः स्वरे सपदान्ते च छोटइति ठसापवादः अ
वसाने रघातन्त उपानत् उपानहौ उपानहः उपानद्भ्यां उपानत्सु इति रकारान्तो दिवशब्दः दिव औ दिव औ दिवशब्दस्य औ
कारादेशो भवति सौ परे दिव इति षष्ठीनिर्देशात् दन्त्यस्य वकारस्यौकारः इयं स्वरे सोर्विसर्गः द्यौः हे द्यौः वामि दिवौ दिवः
रसामि परे आत्वं भवति द्यां दिवं दिवौ दिवः दिवा उः रसे दिवशब्दस्य उकारादेशो भवति रसे परे उरस इति वकारस्य आ
उकारे परे सेपदान्ते च इति मात्रियं येन पूर्वविप्रतिषेधात् इति वकारस्य उकारे कृते इयं स्वरे द्युभ्यां द्युभिः इत्यादि
रेफान्तः चतुरशब्दः त्रिचतुरोः स्त्रियां तिसृचतसृ अवत् त्रिचतुरोः स्त्रियां तिसृचतसृ आदेशौ स्त्रियां वर्तमानयोः त्रिचतुरश
ब्दयोः तिसृचतसृ इत्यादेशौ भवतः ऋमात् आकारः स्वरे रेफवत् तेन सकारार्थं इत्यादि न भवतीति पाठः [illegible] इत्यनेन अ
कारः [illegible] आप्नोति आदिशब्दात् [illegible] स्त्रियां नेन [illegible] प्राप्नोति [illegible] वति तयाशाति [illegible] सोरस्य इत्यकारलोपो न भवति
इति ज्ञेयं तिस्रः तिस्रः चतस्रः चतस्रः तिसृभिः चतसृभिः तिसृभ्यः चतसृभ्यः तिसृणां चतसृणां नुमागमः [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

ते नतिसृचतसृशंष्टोनामिदीर्घो नैनामीनिदीर्घत्वं भवतीति छन्दसितु वादीर्घो भवति तिसृणां चतसृणां तिसृषु चतसृषु स्त्रिय
श्चितृकत्वात् मुख्यतया स्त्रीलिंगे वर्त्तमानयोस्त्रिचतुरशब्दयोर्वाच्यलिंगत्वेपितिसृचतसृ आदेशो भवतः यथाप्रियास्तिस्रः चत
स्रो वायस्याः सप्रियतिसा सप्रियचतसा प्रियतिसोप्रियचतसो इत्यादि ज्ञेयं यदाप्रिया स्त्रयस्त्रीनि वायस्याः साप्रियत्रिः प्रि
यचत्वार इत्येव ज्ञेयं रेफान्तो गिरशब्दः र्वोर्विहसेदीर्घः य्वोर्विहसेदीर्घः ईश्च उश्च युसयोर्धा वहवचर्वतस्मिन्नादि धातोश्च वा
न्तवरयोर्दीर्घो भवति रेफरकारयोर्हसपरयोः गिरसइत्यत्र हसेपरे रेफे सति दीर्घत्वं हसेपः सस्लोपः स्नोर्विसर्गः गीगिरौ
गिरः गीर्भ्यां गीर्षु एवं पुरधुरादयः धकारान्तः समिधशब्दः वावसाने समित्समिद् समिधौ समिधः रुभे जवा समिद्भ्यां इत्या
दि संभेचपारुस्तानां समित्सु भकारान्तः ककुभशब्दः वावसाने ककुप ककुब रुभे जवा ककुब्भ्यां खसे चपा ककुप्सु द
कारान्ता स्त्यदादयः तेषां त्यदादेष्टेरः स्यादाविति सर्वत्राकारादेशः आवतः स्त्रियां अकारान्तो नाम्नः स्त्रियां वर्त्तमानादा
प्प्रत्ययो भवति आप इत्यत्र पकारकार्यमाह पकारः स्थितिलोपार्थः सवर्णेदीर्घः सह आप इति स्थितिलोपः स्त्रीलिंगसर्व
द्वत्प्रूपं स्यात्सेत्यायायेया सातेताः एता एते एताः इत्यादि एवं किमकाकेकाः इत्यादि इदमशब्दस्य भेदः इयं इमे

४

© Dharmartha Trust J&K. Digitized by eGangotri

इदमशब्दस्य स्त्रियामियमादेशो भवति सौ परे सिमहिस्येयमादेशः इयमित्यादिशे कृते हसन्तत्वात् सिलोपः यदि वा त्यदाद्येष्व-
रस्यादेशोरिति अन्ते कृते आपइति सिलोपः पश्चादियमादेशः द्वसमः इमे इमाः अनटौसोः एअयः अनया आभ्यां आभिः अ-
स्यै अस्याः अनयोः आसां अस्यां अनयोः आसु पूर्ववत्साधनप्रक्रिया ककारान्तः त्वचशब्दः चोः कुरिति कत्वं वावसाने त्वक् त्व-
ग् त्वचौ त्वच एवं स्रच स्रच कु अचौ एवं वाच वाचौ इत्यादि कुत्वे क्विलात् इति षत्वे कसंयोगे क्षः त्वक्ष वाक्ष स्रक्षु पकारान्तोऽप्श-
ब्दो नित्यबहुवचनान्तः भिदपामिति सूत्रे बहुवचनं ज्ञापकं वत् अपशब्दो नित्यबहुवचनान्त इति स्मम्महतो दीर्घः शौ च आपः
आपः भिदपां अपां अपशब्दस्य भकारे परे दकारो भवति षष्ठीनिर्दिष्टस्यान्त्यस्य पकारस्य दकारे जाते अद्भिः अपादीनामित्य-
पाठः शकारान्तो दिशशब्दः दिशांकः दिशदृशस्पृश इत्यादीनां रसे पदान्ते च कत्वं भवति दिक् दिग् दिशौ दिशः दिक्षु दृक्
दृग् दृशौ दृशः स्पृक् स्पृग् स्पृशौ स्पृशः इत्यादिशब्दान् ऋत्विक दधृक उष्णिक् षकारान्तः त्विषशब्द षोडः त्विट् त्विड् त्विषौ त्वि-
षः एवमेव पामसानां पदान्तता भ्वयणीयान्विट्सु आशिषशब्दस्य सजुषशब्दवत् रूपं ज्ञेयं आशीः आशिषौ आशिषः दोषा-
मिति षस्य रेफः सजुषामेषो वसे पदान्ते च दीर्घो वक्तव्यः आशीष्षु स्त्रीलिंगस्य अदसशब्दस्य सौ न विशेषः सौ सः से रो असौ

© Dharmartha Trust J&K. Digitized by eGangotri

द्विवचनादौ तु अदादेः घेः स्यादौ ई इत्यकारे कृते विभक्तिकार्ये च कृते माभूदिति ह्रस्वस्य ह्रस्व उकारो दीर्घस्य दीर्घो भवति अमु
अमू अमुं अमू अमूः स्त्रीलिंगत्वात् नत्वाभावः टौसोरे अमुया अमूभ्यां अमूभिः अमुष्यै अमूभ्यां अमुष्याः अमुष्यां अमुयोः अ
मुषु एवं प्राक् सूत्रैः सिद्धिः ॥ ० ॥ इति स्त्रीलिंगशब्दानां हसान्तानां विभक्तिषु विडपापुंजराजेन साधप्रक्रियो
दिता ॥ ० ॥ अथ हसान्तनपुंसकलिंगाः प्रदर्श्यन्ते रेफान्तो वारशब्दः स्यमोर्लुक् रोर्विसर्गः वाः ई औ ओ आकारस्य ईका
रः वारी जस्शसोः शि वारि वाः वारीयम प्रत्याहारान्तत्वात् नुमागमः वारा वार्भ्यां वार्भिः वार्षु इत्यादि चतुर्शब्दे चतुरामउवं
सम्त्वाविरः संख्याया इति स्नह् चत्वारि शेषं पूर्ववत् नकारान्तोऽहन्शब्दः अहस्नः अहन्शब्दस्य नकारस्य सकारादेशो भवति
असुपदान्ते च स्यमोर्लुक् स्रोर्विसर्गः अहः ईं औ वेङ्याः अह्नी अहनी इति द्विवचने रूपद्वयं जसि शसि च शौ लोपधाया इति
दीर्घत्वं अहानि अल्लोपः स्वरे व वसयुक्तात् असौ इत्युपधाया अकारलोपः अह्ना अह्ने अह्नः अह्नः अह्नोः अहोभ्यां
अहोभिरित्यादौ अहन् इति नकारस्य सकारे कृते स्रोर्विसर्गः हवे इति उकारः उअ इत्यादि सूत्रैः सिद्धिः वेङ्याः अह्नि अहनि
२ अहःसु ब्रह्मन्शब्दस्य सामान्यतः साधनं दर्शयति ब्रह्मन्शब्दस्य असंपदान्ते च नलोप इति स्यमोर्लुक् ब्रह्म ब्रह्मणी ब्रह्मा

© Dharmartha Trust J&K. Digitized by eGangotri

शिश्चवमयुक्तादिति विशेषणात् उपधायाश्चकारस्य न लोपः एवं ब्रह्मन् प्रभृतयो मकारसंयुक्तत्वात् उपधालोपोऽहनप्र
इति भावः प्रकृतग्रहणात् शर्मन् कर्मन् इत्यादयः छन्दसि नाम्नो नामदन्नानोङि॰ श्योर्वा लोपो वक्तव्यः परमे व्योमन्
परमे व्योम्नि इति लोपे परमे व्योमन्निति छन्दसि पठन्ति तथा सद्यानि भूतानि इति वक्तव्ये सुमसहितानि लोपे सर्वाभूतानि छन्द
सि त्यदादीनां माह त्यदादीनां समोऽलुकि कृते टेरत्वं भवति स्यादाविति विशेषणात् सूत्रे हि त्यदादेष्टेर
विहितोऽस्ति तस्मात् सौ अमि च लुप्ते न तन्निमित्ते रकारो भवतीत्यर्थः वावसाने त्यदत्यद् तदयदस्य समोऽलुक् त्यदशब्दवत्
द्विवचनादौ त्यदादेष्टेरः स्यादाविति सर्वत्राकारादेशे कृते सकारलक्षणत् नपुंसके इदमेतदोरन्वादेशे अमि एनमिति वक्त
व्यं किमशब्दस्य समोऽलुकि टेरकारो न स्यात् तत्रैटेरकारे कृते पूर्ववत् प्रक्रिया किं के कानि २ केन इत्यादि चकारान्तप्रत्यञ्
शब्दः समोऽलुक् चोः कुः प्रत्यङ् अञ्चेदीर्घश्च यकारलोपे पूर्वस्य च दीर्घः प्रतीची विनो नुम् प्रत्यञ्च शेषं पूर्ववत् पूजायां
लु प्रत्यङ्॰ प्रतीची प्रत्यञ्चि प्रत्यञ्चेत्यादि तकारान्तो जगत् शब्दः जगत् जगती जगन्ति इत्यादि महच्छब्दे तु सम्महतड

© Dharmartha Trust J&K. Digitized by eGangotri

42

ति सविषये दीर्घत्वं महान्ति पुनरपि महत् महान्तौ महतः शेषं पूर्ववत् सकारान्तः पयस्शब्दः तेजस्वचस्प्रभृतयः स
र्वे साध्याः पयः पयसी पयांसि पयसा पयोभ्यामित्यादि अदस्शब्दस्य प्रथमाद्वितीययोरेकवचने विशेषमाह स्यमोर्लुकि
कृते स्त्रो विसर्गः इति अदः द्विवचने टत्वे कृते अदस्मते माभूदिति दीर्घे उकारे कृते अमू दस्मते आत्वमिति दीर्घे उपधादी
र्घत्वे दीर्घे उकारे च कृते अमूनि पुनरपि अदः अमू अमूनि अमूना अमूभ्यां अमीभिः इत्यादि पूर्ववत्॥ ॥ ॥
इति श्रीवृहस्पान्तानां रूपनिर्णयः श्रीमता कुलदीपेन श्रीपुञ्जराजेन प्रकाशितः॥ ॥ अथ युष्मदस्मदोः
स्वरूपं निरूप्यते स्वकं रूपं स्वरूपं एतेन यद्यपि समस्यमानयोर्युष्मदस्मदोर्गुणतायां कश्चिद्रूपविशेषः सम्भवति तथा
पि स्वमेव रूपं निरूप्यते तेन तद्गुणत्वे विशेषादिकं लौकिकपदप्रयोगनिष्पन्नत्वेन तन्मात्रप्रयोगदर्शनस्य प्रतिज्ञातत्वादि
ति तयोश्च वाच्यलिंगत्वात् त्रिष्वपि लिंगेषु समानरूपमिति तयोर्युष्मदस्मदोर्वाच्यलिंगत्वात् स्वविषये लिंगद्योतका
४२ भावात् वाचि अलिंगत्वं वचनं वा कृतसंज्ञा वाचि तद्धारणो अलिंगत्वं लिंगत्वाभावः तस्मात्त्वमभिधेय लिंगत्वात् तच

© Dharmartha Trust J&K. Digitized by eGangotri

तुसर्व्वादिवत्तद्व्यभिचरति सर्व्वो लोकः सर्व्वा जगती सर्व्वं जगत् इत्यादौ लिंगत्रयेनेकयाव्यभिचारो दृश्यते न त्वत्तु त्वं शिवः त्वं शक्तिः
त्वं ब्रह्म इत्यादौ त्वशब्दविषये लिंगत्रयेनेकाभावात् एवमपि लिंगेषु समानं रूपं तस्मादद सशब्दवत् यत्रिलिंगे युष्मदस्मदोः स्वरू
पं निरूपितमिति भावः त्वमहं सिना यूयं वयमित्यादौ टानास्त्रियामित्यादिवत् लिंगविशिष्टविभक्तिकार्य्यानभिधानात् सूत्रकृ
तापि द्योतितो ऽयमभिप्रायः अतएव लिंगत्वप्रसिद्धये त्रिलिङ्ग्यात् पृथगेतयोर्न्निरूपणां विहितं तत्रैतिच कारात् षकारनकारान्त संख्या
याः कतिशब्दस्यापि त्रिषु लिंगेषु समानरूपं द्योतयति त्वमहं सिना युष्मदस्मदोः सहितयोः यथासंख्येन त्वमहमित्येतावादेशौ भ
वतः युष्मदत्वं अस्मदो ऽहं सिना इति महार्थे तृतीया युष्मदसि इति स्थिते सिना सहितयोरादेशात् त्वं अहं प्रियस्त्वं युवां युयं वा यस्य
स प्रियत्वं प्रियो ऽहं आवां वयं वा यस्य स प्रियो ऽहं इत्यादि भवति धयूवावौ द्विवचने युष्मदस्मदो द्विवचने परे युवावा वित्येतावादेशौ
भवतः यथासंख्येन त्वामौ त्वांआं युष्मदस्मदोः परे अत्वाम भवति युवां आवां युष्मदस्मदो द्विवचने युवावौ न तद्व्यर्थवाचित्वम
त्वेन युवयोः पुत्रः अस्मत्पुत्रः इत्येव भवति यूयं वयं जसी जसा सहितयो युष्मदस्मदो यूयं वयमित्येतावादेशौ भवतः यूयं वयं
प्रियस्त्वं युवां यूयं येषां ते प्रिययूयं एवं प्रियवयं त्वष्मदस्मद त्वाम त्वन्मदेकत्वे युष्मदस्मदोस्त्वन्मत् इत्येतावादेशौ भवतः

© Dharmartha Trust J&K. Digitized by eGangotri

एकत्वेगम्यमाने एकत्वंनामएकार्थवाचित्वं नतुएकवचनमात्रेनत्वम पुत्रोमत्पुत्रः इत्यादौत्वन्मदादेशौभवतः आमस्नो युष्म
दस्मदोष्टेवात्वंभवति अमिसकारेभिन्नेचपरे त्वांमांयुवांवौद्विवचने आमौयुवांआवांत्यदादेष्टेरत्वेशसीतिदीर्घत्वेकृते अ
लिंगत्वात्अप्राप्तेमोनःपुंसः इतिनत्वेनत्वविषयेवक्तव्यं करोति शसोनोवक्तव्यः इतियुष्मान्त्वन्मदादेशेकृते एटाड्योः यु
ष्मदस्मदोष्टेवात्वंभवतिटाङि.इत्येतयोः परयोःआदेशिवदादेशइतिन्यायात् त्वन्मदादेशयोष्टेरेत्वंअयादेशः त्वयामया
युवावादेशेआड्डीत्यात्वंआवाभ्यांत्यदादेष्टेरः आमास्नयुष्माभिः अस्माभिः तुभ्यंमह्यंङ.या ङ.येतिसहार्थेतनीयात्तदेववि
वृणोति ङे.सहितयोःयुष्मदस्मदोस्तुभ्यंमह्यंइत्येतावादेशौभवतः तुभ्यंमह्यं प्रियात्वंयुवांयुयंयस्मप्रियाः अहं आवां
वयंवायस्मत्स्मैप्रियतुभ्यंप्रियमह्यं इत्यादिज्ञेयं युवाभ्यांआवाभ्यां भ्यसःशभ्यम् युष्मदस्मदोःपरोभ्यसःशभ्यमभवति श
कारोभकारादिव्यावृत्यर्थः नयोर्वविहितस्तेनाड्डीत्यात्वंएतिवहुत्वे इत्येवंनभवति युष्मभ्यंअस्मभ्यं ङ.सिभ्यसोःअ ङ.सिसा
हचर्यात्पञ्चम्याएवभ्यसःगृह्यते शकारःसर्वादेशार्थः त्वन्मदादेशेकृतेटेरत्वेकृतेत्वत्मत् इतिरूपं युवाभ्यांआवाभ्यां
४३ त्यदादेष्टेरत्वेवकृते भ्यसःअयुष्मत् अस्मत् तवममङ.सा ङ.सासहितयोर्युष्मदस्मदोस्तवममइत्येतावादेशौभवतः तवम

© Dharmartha Trust J&K. Digitized by eGangotri

मप्रियस्त्वं युवां युयं च यस्य प्रियस्त्वं तस्याप्रियस्तव तज्ज्ञः पुरुषः तथाप्रियः अहं आवां वयं च यस्य तस्याप्रियाहं तस्य प्रियो मम इत्या
दि ज्ञेयं युवावादेशः असीत्येत्वे कृते एत्व अयययुवयोः आवयोः सर्वादित्वात् आमि त्वाट् कृते साम आकम् सुट सहित आमूम
म युष्मदस्मदोः साम् आकम् भवति युष्माकं अस्माकं सुट् सहितस्याम: अकमादेशविधानं एत्त्वं त्वत्वे इत्येकारनिवृत्त्यर्थं नत्वा
मस्त्वावित्याकारस्य निवृत्त्यर्थं कृतेपि तस्मिन् रूपविपर्ययः स्यात् इति प्रियस्त्वमहं युवां आवां यूयं वयं च येषां ते तेषां प्रियास्मा
कं इत्यादि तु द्युं त्वन्मदादेशे कृते एटाड्योः त्वयि मयि युवयोः आवयोः आमस्तो इत्यात्वं युष्मासु अस्मासु प्रियस्त्वयि प्रियम
यि इत्याद्यं अत्र वालव्याकुलताभावात् समस्यमानो ह्येकत्वं वाचिनी युष्मदस्मदी समासार्थो ऽन्यसंख्यश्चेत्तौ युवावौ तव
ममापि इत्यादि इत्यादि विशेषप्रपञ्चस्तु न प्रपञ्चितः स लोकात् शेषस्य सिद्धिकृत्कत्वात् अन्यतो ऽवगन्तव्यः ग्रन्थकृतस्त्व
स्वरूपं निरूपितमित्येव प्रतिज्ञातं तु समासो ऽर्थवशात् त्वामामाद्यादेशविशेषे गुणान्तयान्यथाभूतानि रूपाणि निरूपयतु तस्मात्
ग्रन्थानुसारिणो ऽयमपि तस्मिन् विषये उदासीना स्मः अथानयोर्वादेशविधिः अनयोर्युष्मदस्मदोर्वादेशविशेषस्य विधेर्विधानं
उच्यते इति शेषः युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वांनावौ वसनसौ युष्मदस्मदोरमी आदेशा यथासंख्येन भवन्ति की

© Dharmartha Trust J&K. Digitized by eGangotri

44

स्थयोः षष्ठीचतुर्थीद्वितीयाभिः सहितयोर्युष्मदस्मदोरित्युक्तं विभक्तेर्वचनत्रयार्थकत्वात् षष्ठीचतुर्थीद्वितीयानामेकैकव
चनेनतेमे द्विवचने वांनौ बहुवचने वस्नसौ भवत इति त्वर्थो न्द भगतेमे देवविष्णो ति तत्रैकवचनेइत्यादिना द्वितीयाचतुर्थीषष्ठी
निवर्त्यन्ते तु नक्रमेण षष्ठीचतुर्थीद्वितीया इत्युक्तत्वात् क्वचित्त्वयामयाइत्यास्मिन्नर्थे तेमे भवतः इत्यभिसूच्यते यथास्मत्तन्त्रे
लिखितं इत्यादिप्रयोगेषु उदाहरणानि स्वामीतेसौमभायातः स्वामीमेसापतंगत इति च युष्मदस्मदोर्ङे. सा सहितयोर्वादेश
विशेषः नमस्ते भगवन् भूयो देहि मे मोक्षमव्ययं इत्यत्र ङे. सहितयोर्वादेशविशिष्टः द्वितीयैकवचनेन त्वादेशान्तरं भविष्यति स्वा
मी वां युवयोः स उत्रैर्जहार्स किंकृत्वा नौ त्वावयोर्दीनयानमं दीनतीव्रवेदनार्दितम् अस्मिन्नादेशविशेषः राजा वां युवाभ्यां दानं दा
स्यति ज्ञानं नौ त्वावाभ्यां मधुसूदनो दास्यति इति चतुर्थीद्विवचने देवो वां युवां त्ववेतात् कोदेव इत्यादि हरिर्विष्णुः नरकान्नौ त्वावां
जनार्द्दनः त्ववतात् इत्यपेक्षते स्वामी वो युष्माकं वल्लवान् राजा स्वामी नः त्वस्माकं त्वसौ जनार्द्दनः इत्यादि नमो वो युष्मभ्यं
ब्रह्मविज्ञेभ्यः ज्ञानं धनं नः त्वस्मभ्यं दीयतां इति भवाम्पि सानन्दान् वः युष्मान् प्रपश्यामः पश्यामो नो त्वस्मान् सुदुःखितः पश्यामः
४५ द्वितीयैकवचनेउत्सर्गेणाप्राप्तः त्वा मे त्वादेशस्य बाधकं सूत्रं प्रणयति त्वा मामा त्वमा सहितयोर्युष्मदस्मदोस्त्वामाइ

© Dharmartha Trust J&K. Digitized by eGangotri

त्येनावादेशौ भवतः पश्यामि त्वा मद्दालिटं पश्य मा मद्भेदकं इति अन्वादेशे तु तेमआदयः एव प्रयोक्तव्याः तत्र वादयः यथा जन्म
योऽहमीशानं तस्य मेन्योऽस्ति न प्रभुः तस्मै मे देहि सन्तोषं तं मामात्वं परित्यज इत्यादि ज्ञेयं नादौ पदादौ वर्त्तमानयो युष्मदस्मदो
नैतत्त्वादेशा भवन्ति सूत्रे आदाविति सामान्येनोक्तत्वात् वाक्यादावपि नैते त्वादेशा भवन्तीति ज्ञेयं तव यशस्त्वेवोराजन् मम तत्प्र
तिशत्रवः इति पदादौ तेमे त्वादेशा न जातौ तव प्रासाद्यगुणाविमानश्च कुलमित्यादौ वाक्येपि ज्ञेयं चादिश्च चादिभिरपि योगे नै
ते त्वादेशा भवन्ति च वा ह अह एव इति पञ्चैव चादयः एतैः साक्षात् योगे सति नैते त्वादेशा भवन्तीत्यर्थः तव मम च स्वमाममत्तदा
सीत् तव मम वा न किमपि न्वसौऽधमसि तत् तव मम स्व मह अहं चकास्ति सख्यं तत्तव मम अहं भवेत् कचिद्धि योगः भवतु तव ममैव सर्वदा स
न्निधानं इत्यादि द्विवचनादावपि प्रयोगवशाज्ज्ञेयं रामं तव दासो स्मि हे मम तु भ्यं नमः इत्यादिषु सम्बोधन पदादपि नैते त्वादेशा
भवन्ति विसेषसंबोधन पूर्वास्तु यथा हे रेकू पाल्लो नः पाहि लोकान्छेषेते यं तैरुक्ताहि नामाख्यातो विसर्गा निपाता इति चातुर्विधं
शब्दानामनन्तानि अत्र विभक्ति नामन्यादि नाना मनिरूपितं आख्यातं तु अग्रे अमो भिधास्यते अधुना उपसर्गान् निपातांश्च वाल
व्युत्पत्यार्थं प्रसिद्ध संज्ञापूर्वकं निर्द्दिशति चादिर्निपातः चादिर्गणो निपात संज्ञो भवति तमेव निर्दिशति च वा ह इत्यारभ्य स्वरान्ते

© Dharmartha Trust J&K. Digitized by eGangotri

त्येतावत्पर्यन्तेन ग्रन्थेन चादयोऽपरिमितार्थत्वात् कस्मिन्नर्थे व्याख्यातुं उक्तं हि निश्चयेन पतन्त्यनेकेष्वर्थेष्विति निपातानामनेका
र्थत्वं तथापि वल्लभ्युत्पत्तये अर्थविशेषाः प्रदर्श्यन्ते च समुच्चयान्वाचयेतरेतरयोगसमाहारेष्विति नियोगतुल्ययोगेतावधा
रणाहेतुषु वाविकल्पउपमानद्वन्द्वसमुच्चयानवक्लृप्तिषु ह विनियोगाभिक्रमपादपूरणेषु अहे विनियोगाचारवाभिचारपू
जासु एव अवधारणादौ एवं प्रकृतिपरामर्शप्रकार इवार्थे अपदेशनिश्चयांगीकरणेषु नूनं विभक्तिकार्य्यार्थनिश्चयोः
पृथक् नाना एतौ भेदार्थौ विनाकृते अन्तरेणाति वर्ज्जनार्थौ स्वस्तीत्यविनाशे अस्तीति सत्तायां अस्तीत्यादयो व्याख्याताः प्रकृ
तिरूपकाः स्यात् शब्दः अनेकान्यपर्य्यायः दोषानक्तं रात्रौ मृषा मिथ्या इत्यनिर्वाचे मिथः परस्परं अथ अथो इत्यानन्त्या
धिकारमंगलार्थानन्तरविवक्षासु ह्यः पूर्वदिने श्वः परदिने उच्चैमउच्चारचयोः स्वः स्वर्गे अन्तरमध्ये प्रातः प्रभाते प्रत्यु
षे पुनः भूयः पौनःपुन्ये अहोस्विदिति वितर्के सह साकं समं सत्रं सार्द्धं अमा नो ना प्रतिषेधे इति सत्स्वन्ते अन्तरमध्ये नमस्
४५ प्रह्वीभावे अलं भूषापर्याप्त्यादिषु हे इति वारणे अहं इति चलाप्रतिषेधे ईषत् न्यूनत्वे किल स्वल्पत्वे निश्चयस्मरणयोः आ
वात् दूरान्तिकयोः भृशमत्यर्थे यत्कारणे तत्कारणे स्वराश्चेति स्वरप्रतिरूपकाश्च निपाताः संज्ञका भवन्ति अथ संबोधने

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यर्थे नेत्यत्र हा इत्यस्मिन्नर्थे अनुकम्पायामाश्चर्ये च अन्यवर्न्नौ स्तो भवचनौः सम्बोधने ऐश्चाचर्ये अत्र नूनं ये ओ भवत्य
र्थे अम त्वंगीकारे आः साध्वसाश्चर्ययोः एतेषु केचिद्द्योतकारादयः केचित्तु वाचकाः प्रथमादयः उक्तं हि केऽप्येषां द्योतकाः के
पि वाचकाः केऽप्यनर्थकाश्चागमाद्युवत्केऽपि स्युः संभूयार्थस्य साधकाइति अथ प्रत्ययान्तान्निपातानाह तत्रादिविभक्त्यर्थे निपा
त्यन्ते तावदनिरूपयाति तस्मिन्निति सप्तम्यर्थे तत्र यास्मिन्निति यत्र कस्मिन्निति कुह कुत्र कस्मिन् काले कदा तेन प्रकारेण तथा ये
न प्रकारेण यथा अनेन प्रकारेण इत्थं तस्मादिति ततः यस्मादिति यतः अस्मादिति अतः सार्वविभक्तिभ्यस्तस् एत्येके सर्वा
सां विभक्तीनामर्थे भवतीति सार्वविभक्तिकः तस इत्येके वैयाकरणा वदन्ति पूर्वतः पश्चात् अग्रतो गच्छत्यादि प्रयोगदर्शनाज्ज्ञेयं पू
र्वस्मिन्निति पुरस्तात् अधस्तात् परस्मिन्निति परेण दक्षिणस्यां दिशि दक्षिणाहि वसन्ति चांडालाः चांडाला वसन्ति इत्यनेन दूरार्थे
निर्दिश्ये आहि प्रत्यय इति सूचितं चांडाला हि ग्रामाद्दक्षिणस्यां दिशि दूरतो वसन्ति तस्माद्दक्षिणाहीत्यनेन सामीप्यवाचिन्यविकरणे
प्रयोग इति ज्ञापितं तस्मिन्निति तत्र इत्यादि दक्षिणाहि वसन्ति चांडाला इत्येतत्पर्यन्तं विभक्त्यर्थे सैवादाहरणं किम इति सर्वविभ
क्त्यन्तात् किमशब्दात्समस्मान्नर्थे वाच्ये चिदादि प्रत्ययो भवति कश्चित् कोऽचित् किञ्चित् कस्मैचित् इत्यादि ज्ञेयं कश्चन कोऽचन केवल

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यादि तदधीनकार्त्स्न्येयोर्वासात् राजाधीनं राजसात् सर्वं भस्मसा त्कुर्वीङ्करवी अंगीकरणोत्कुर्वीकृत्य ऊरवीकृत्य इत्यसर्वं प्रतिरूपक
नयाश्चयं सर्वं भूरीकृत्य वक्ति इत्यादिप्रयोगवशात् ज्ञेयं सद्य आदिकाले निपात्यते सद्य आदिर्गणः सद्यः सपदि अस्मिन्नेव क्षणे इत्यर्थे
अद्य अस्मिन् दिने अधुना इदानीं एतस्मिन् काले साम्प्रतं पूर्वेद्युः पूर्वस्मिन् दिने परेद्युः अपरस्मिन्नहनि यर्हि यस्मिन् काले तर्हि तस्मि
न् काले प्रादिरुपसर्गः प्रादिगण उपसर्गसंज्ञकः प्र परा अप सम अनु अव निर् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति प
रि उप अन्तर् आविस् अयं आदिर्गणः प्रादीनामर्थज्ञापनाय कानिचित् उपसर्गवृत्तिस्थान्युदाहरणानि लिख्यन्ते प्रआ
दिकर्मणि प्रयातः दैर्घ्ये प्रयतः ईशे प्रभुः देशस्य भृशार्थे प्रवदन्ति दायादाः सम्भवे प्रभवति गंगा हिमवतः नष्टो प्रत्युक्तं वियोगे
प्रोषितः शुद्धौ प्रसन्नं शक्तौ प्रशक्तः गतौ परागतः दर्शने परादृष्टः विक्रमे पराक्रान्तः अभिमुखे परावृत्तः हशे पराजितः अधी
ने पराधीनः मोक्षणे पराकृतः प्रातिलोम्ये पराङ्मुखः अपरि योगे अपयाति विकृतौ अपकृतवान् विपरीते अपशब्दः निदर्शने अ
पदिशति आनन्दे अपहसति वर्जने त्रिगर्तादृष्टो देवः चौर्ये अपहरति वारणे अपहसति तुनते अपचयः संयोगैक्यर्थेषु
४५ संगतः पुत्रेण संख्यासमन्ववयात् संजानाति संस्मि अति संस्करोति संधत्ते संगृह्णाति संलभ्य संवेष्टने अन्व अन्वगादौ अनुजा

© Dharmartha Trust J&K. Digitized by eGangotri

नाति अन्वतापः अनुवाकः अनुष्ठानं अनुशयः अनुकृति अन्नधनं अस्तंगतिः अनुयोगः अव अवतादौ अवजानाति अव
गच्छति अवदानं अवलम्बते अवधत्ते अवकिरति निर् निर्णयादौ निर्णीतं निःसंगं निर्दिष्टं निष्क्रान्तः निर्वेशः निश्चलोति दुर् कृच्छ्रा
द्यर्थे दुष्करं दुर्जनः दुर्दिनं दुर्मार्गाः वि विशेषाद्यर्थेषु विशिनष्टि विचित्रावस्त्रशक्त्यः विमुक्तः विकीर्णः विकटः विमनस्कः विभुः वि
वदति विस्मरति विमुखः विक्रान्तः विशिष्टः विलोकयति आङ् आभिमुख्याद्यर्थेषु आगच्छति आकाङ्क्षति आताम्रनखरा
आलिंगति आरभते आमुञ्चति आदत्ते आसन्नः आवसथ आमंत्रणं आशास्ते आहूयते आवदना आरोहति पर्वतं आ एवं
वेदार्था आ एवं गुरुवचनं आधत्ते मोदान् सेवकोऽस्मि हरेः आशक्ताः सर्वे हरिकिंकराः अन्नमः आदिशति आचारः आलवाला
आमोदः आदरः आयातः आवर्तः इत्यादि नि निक्षेपादौ निक्षिपति निकारः निग्रहः निपतति नियमः निशेषः निपुणः निबद्धः
निवहः निषादः निपातः निकृष्टः निदर्शनं निवर्त्तनं निलयः निमेषः निभः निवातः इत्यादि अधि अध्ययनादौ अधीते अधिपतिः
अधीनः अधिक्षेपः अधिष्ठानं इत्यादि अपि समुच्चयाद्यर्थे तदपि भवति अपि योजनमस्तीति सर्वे अपि पापिष्ठः इति गर्हा
यां अपि क्षेमं आशिषि अपिनद्याहारः इत्यादि अति अतिशयाद्यर्थे अतिशेते अतिरथः अतिक्रामति अतिरिच्यते अतिदि

© Dharmartha Trust J&K. Digitized by eGangotri

शति अतिसारः इत्यादि सुप्रशंसायां सुरूपः सुपुष्प आनुल्ले सुगन्धिः सुषमा इत्यादि उत्त उ
द्रेउद्रिक्त उत्क्षेपः उन्मिषः उन्निद्रः उन्नतः उत्थायः उद्गीर्णः उद्धर्मः अभि आति वादाद्यर्थे
अभिवदति गुरुं अभियुक्तः अभिलषित प्रतिज्ञादौ प्रतिष्ठति प्रतिकृतिमा प्रतिग्रहः राजानं प्रतिगच्छति
प्रतिश्यायः प्रतिभा प्रतिकुल प्रतिषेधः प्रतिपुरुषं प्रतिभेदनं परि परिभावादौ परिभवति परिभ्रमति परिवादः परि
करोति परिष्वङ्गः परिचयः परिचरति गुरुं परिशाययति परिधत्ते वासः परिवेदने परिवित्रिगर्त्ते भ्योऽहृष्टो देवः परिधिः परिमि
तं परिहारः परिसरः परिकरः परिष्वंगः परिचयः परिचरति गुरुं परिनयति परिधत्ते वासः उप उपस्थानादौ उत्तिष्ठते
उपकुर्वन्ति ष्ठति उपकरोति उपदिशति उपरतः उपवातः उपचारः उपहारः उपाचितः उपोषितः उपज्ञातं उपक्रमः
उपानयः उपाशयः अतइति स्थिरायां वृद्धौ श्रद्दधाति अन्तरमध्ये अन्तर्गतः आविरुक्तं प्राकट्ये आविर्भूतः प्राग्धातोः
४० उपसर्गा प्राग्धातो प्रयोक्तव्याः व्यवहिताश्चापि प्रयोक्तमाः घ्नयति ष्ठते इत्यादिवृत्त उपसृज्यन्ते इत्युपसर्गाः क्रियायो
गादुपसर्गाः संज्ञकाइत्यर्थः तत्र कश्चिदुपसर्गः धातूनां सह संयोगं प्राप्य धात्वर्थं बाधते तथा वितनोत्यादौ धात्वर्थं वा

© Dharmartha Trust J&K. Digitized by eGangotri

क्षिप्त्वा दानार्थं बोधयति कश्चिद्धात्वर्थमेवानुवर्त्तते यथाऽधीते आशंसते कश्चिदुपसर्गो धात्वर्थं विशिनष्टि यथा विजयते
विघातयति कश्चिदुपसर्गो धातुनाऽकार्थत्वात् धात्वर्थप्राधान्यादनर्थकः यथाऽवतिष्ठते इत्यादिवत् तथा चोक्तं धात्वर्थं बा
धते कश्चित् कश्चित्तमनुवर्त्तते तमेव विशिनष्ट्यन्यो ऽन्येनानर्थकोऽपि अथ निपातानामुपसर्गाणां च सत्तान्तरमाह तदव्ययं त
दिदं चादिशब्दरूपं प्रादिरुपसर्गसंज्ञकश्च उभयमव्ययसंज्ञकं भवति कोऽप्यन्तश्च कोदिप्रत्ययान्तशब्दरूपमव्ययं भवति
मुक्त्वा स्नात्वा क्रयप्रणाम्य विहाय तुमकर्त्तुं हारंहारं कारंकारं शिथिलीकृत्य पटवत् तरामकुतलग्
धा बहुधा शस बहुशः कृत्वसुपद्वेकृ त्वः ततश्चाव्ययसंज्ञामापद्यते संज्ञाकार्यमाह अव्ययाद्विभ
क्तेर्लुक् भवति न शब्दनिर्देशे अव्ययानां शब्दत्वेन स्वरूपनिर्देशे सति विभक्तेर्लुक् न भवति यथा प्रोपाभ्यां समर्थाभ्यां अवेः प्रस
हने उदश्चरः का कर्मकात् इत्यादौ प्रयोगः अव्ययानां न लिंगादिनियमोऽस्ति अव्ययानां लिंगविभक्तिवचननियमो नास्ति
इत्यर्थः सप्तमीमाहं सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं इति त्रिषु लिंगेषु सदृशं
सर्वासु च विभक्तिषु प्रथमादिषु सदृशं सर्वेषु च वचनेषु एकवचनद्विवचनबहुवचनेषु सदृशं यत यस्मात् न व्येति नान्यथाभ

© Dharmartha Trust J&K. Digitized by eGangotri

वति तस्मादव्ययमिति उच्यते यथा उच्चैः पुरुषः उच्चैः कुलं उच्चैः पुरुषेण उच्चैः स्त्रिया उच्चैः कुलेन उच्चैः पुरुषाः उच्चैः स्त्रियः उच्चैः कु
लानि इत्यादौ न व्येति इत्यव्ययमित्यर्थः युष्मदस्मदव्ययनिरूपणं पुञ्जराजेन सारस्वतस्य विवृतौ सम्यक्तमवलम्ब्य युक्तितोऽ
भिहितं उक्तानुवादपूर्वकं उत्तरग्रन्थं संबध्नाति उक्तान्यलिंगानीति अलिंगान्यव्ययानि युष्मदस्मदसहितानि उक्तानि एतेन
युष्मदस्मदोरप्यलिंगत्वं प्रकाशितं अधुना लिंगविशेषविजिज्ञापयिषया विज्ञापयितुमिच्छा विजिज्ञापयिषा तया स्त्रीप्रत्ययाः
स्त्रीवाचकाः प्रत्ययाः प्रस्तूयन्ते स्त्र्यधिकारविहिताः प्रत्ययाः प्रशस्यन्ते वाला हि प्रत्ययविशेषेण लिंगविशेषं ज्ञास्यन्तीति भावः
आवतः स्त्रियां अकारान्तान्नाम्नः स्त्रियां वर्तमानात् आप् प्रत्ययो भवति इति आपि विहिते आप् इति सेर्लोपः जाया माया श्र
द्धा धाराः एवमादिषु स्त्रीप्रत्ययविशिष्टशब्देषु वालानां लिंगविशेषज्ञापनं भवतीति लिंगविशेषविजिज्ञापयिषयेति युक्तमे
वोक्तं इत्यादि आदिशब्दात् शिरःतटतनदादिव्यतिरिक्ता गंगा गोदावरी प्रभृतयो अकारान्ता ज्ञेयाः अजादेश्चापूर्वकव्यः
४९ जातेः स्त्रीविषयादयोपधादीनां विधास्यमानस्यापो नामीनादृन्नयिवक्कव्यविधानं अजा एडका कोकिला वालाः दंष्ट्रा शूद्रा
जातिः पुंयोगे तु शूद्रस्य स्त्री शूद्री महाशूद्रशब्दात् जातौ पुंयोगे पि न आप् महाशूद्री अजादेरापइति चकारात् गंगाकान्ते

© Dharmartha Trust J&K. Digitized by eGangotri

नसीमनशब्दान्नवाच्यापसीमेसीमानौ बहुराजबहुराजानौ बहुराजेत्याद्यनुक्तसमुच्चयार्थस्तच्चकारो मन्तव्यः गनिका
इत्यादावकारविधानार्थमाह कात्प्रतः कापिइत्वमतः कापिककारपूर्वकेप्यापिपरेऽकारस्येकारोभवति ककारात्संवाह
नश्चापकाप् इतिज्ञेयं मतुरुत्यादित्ववहितः तेनवहुपरिव्राजकानगरीत्यादावकारोनभवति ककारकारिकापाचकपा
चिकापाठकपाठिका पावकपाविकाइत्यादि हलान्तेष्वप्यापंदर्शयितुंकेषाञ्चिन्मतमाह: वष्टिभागुरिवल्लोपमवाप्योरुप
सर्गयोः आपश्चापिहलन्तानांयथावाचानिशागिरा भागुरिनामाऋषिः अवाप्योः अवअपिअ अवापीतयोरवाप्योः
नशब्दनिर्देशइत्युक्तत्वान्नाप्ययाद्विभक्तेलुक् तयोरुपसर्गयोः क्रियायोगेप्राप्तयोः प्राप्तयोरेवअकारस्यलोपंवष्टिइच्छति
यथाचावाचादिशागिरा इत्येतेशब्दाः यथानाहशामेवहलान्तानांचापश्चेदिच्छति एतेनस्वेच्छयानप्रयोक्तव्या इत्यभिप्रायः
ह्रस्वोवा स्त्रियांकापिपरेनवादौवपूर्वस्यह्रस्वोवाभवति वोनकावेशीकानदिकानदीका श्रेयसितवाश्रेयसीतरा रामे
हुतवारामोरुतवाखिन्नवाखीतरा द्विलघितवाविदुषीतराविदधितमाविदषीतमाविदन्तमाचभवतिवा भवानितवाइत्यादि
नौकादौ नौकादौह्रस्वतायाअभावःस्य वाग्रहणादिवसिद्धमिति निश्चयेनपतन्त्यनेकेषुअर्थेष्विति निपातानामनेकार्थत्वात्

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यादिरूपसिद्धिः नौकादारिति शब्दात् सर्वैकास्य नौकादादित्यादि समस्वरानान्तानां संग्रहः न्नराः ईपू नकारान्ताद्धकारा
न्तादनन्ताच्च स्त्रियामीपप्रत्ययो भवति नकारान्तात् दंडिनी ईपि राज्ञो राजन् शब्दस्य च लोपो वक्तव्यः राज्ञी वक्तव्यस्य प्रयो
गवशात्वात् अन्यत्रापि द्विदामीत्यादौ भूमिः स्वनाम्नीत्यादौ अल्लोपो ज्ञातव्यः श्वादेरिति वस्य उत्वं शुनी मघोनीति ऋकारान्ता
त् कर्त्री हर्त्री च नन्तात् अपगवइति स्थिते यस्य लोपः इश्च श्च श्चयः न स्य लोपो भवति स्वरे यकारे च परे विभक्तिस्वरवर्ज्जिते स्व
रेयु प्रत्यय विहिते यकारइति ज्ञातव्यः तेनेदं व इत्यत्र उधौ युरित्यत्र न ओपगवी ऋकारान्तेपि स्वसादीनां नकारान्तेपि सं
ख्यावाचिनाश्च ईपू नेति वृत्तिस्थाच्चकारावसेयं स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता नप्ता नातेति मपौ तस्वसादयः उ
दाहृताः पञ्चनवइति द्विवतः षचटवतउच अच धूइत्ययस्य सन्तथातस्मात् षकारटकारतकार ऋकारानुबन्धात् स्त्रियामी
पू प्रत्ययो भवति षप्रत्ययान्तात् वराकी टप्रत्ययान्तात् कुरुचरी उप्रत्ययान्तात् तुमप्रत्ययाद् ऋकारानुबन्धात् गोमती अशत्र
४९ न्तात् पचन्ती इत्यादि द्विनः इति ईपू धातो न भवति नपुषन पा इत्यादौ पनीत्याद षस्य पत्न्यादिपाठ पूर्वपात सिद्धान्ति ट
स्यानन्य प्रयोजनत्वात् धेट्लुस्माढवस्तनन्धयी नदादेः नदादेर्गणात् स्त्रियामीपू प्रत्ययो भवति नदी गौरी गोतमी इत्यादि

© Dharmartha Trust J&K. Digitized by eGangotri

नदादिराकृतिगणो मन्तव्यः तेन पुत्री पीवरी जित्वरी शर्वरी द्वादशी चतुर्थी पञ्चमीत्यादीनां शिष्टप्रयोगदृष्टानां इहापि विवक्षि
तत्वज्ञनानां नदादिगणे एवान्तर्भावो वेदितव्यः इन्द्रादेवाणीषु ब्रह्मरुद्रभवशर्वमृडवरुणा आदिशब्देन गृह्यन्ते मातुलाचा
र्योऽर्योपाध्यायक्षत्रियेषु विकल्पः तथा हि पुंयोग एव आचार्यादणत्वञ्च ब्रह्मन् शब्देन लोपश्च हिमारण्ययोर्महत्त्वे यवला
ल्लिप्यां यवाद्दोषे इत्येतावत् कृत्यं आनी इति चकारात् आगमं इन्द्राणीत्यत्र नैर्णोऽनन्ते णत्वं ब्रह्माणी नलोपे कृते रूपसिद्धिः
भवानी शर्वाणी मृडाणी वरुणानी मातुलानी आचार्यानी अर्याणी उपाध्यायानी क्षत्रियानी इति अरण्यान्महत्त्वे अरण्या
नी हिमात् हिमानी यवनाल्लिप्यां यवनानी अन्यत्र यवनस्य स्त्री यवनी दुष्टे यवे यवानी इत्यादि ज्ञेयं ईप् समाहारे गुणाश्च समा
हारे ईप् भवति त्रेर्गुणोऽपि भवति त्रिशब्दादीपि गुणे कृते त्रयीति रूपं पुंयोगे च अकारान्तात् पुंयोगे च ईप् प्रत्ययो भवति शूद्रस्य
स्त्री शूद्री गणकस्य स्त्री गणकी जातेरयोपधात् अयकारोपधात् जातिवाचिनोऽकारान्तात् स्त्रियामीप् प्रत्ययो भवति महिषी शूक
री हंसी कुक्कुटी ब्राह्मणी इत्यादौ जातिवाचकादीप् अयकारोपधाग्रहणात् क्षत्रिया वैश्या प्रवयादिवर्जितात् यकारोपधादिति ज्ञेयं
प्रथमवयोवाचिनोऽत ईप् वक्तव्यः कुमारी किशोरी कलभी कन्यायां न भवति कन्या प्रथम इति प्रथमग्रहणं वृद्धापेक्षया ते

© Dharmartha Trust J&K. Digitized by eGangotri

नचिरटातरुणीत्यत्रभवति वृद्धास्थवीराइत्यत्रन अतइत्युक्तत्वात् शिशुः अत्रप्रथमवयस्यपिन प्रच्छाद्या दीर्घपुच्छीदीर्घपु
च्छा स्वादिष्टो स्वांगवाचिनोवास्त्रियामीपप्रत्ययोभवति अत्रवाशब्दः सुमुखीत्यादौविकल्पंपश्यवदनादौक्रोडादौचनिषेधं
अंगगात्रकण्ठेभ्यादिषुविकल्पंद्योतयति स्वांगवाचिनइत्युक्तत्वात् उपसर्जनीभूतादेवस्वांगादीप् नतुग्रीवाकरकर्णेभ्या
दावनुपसर्जनत्वेपिस्त्रियामपीतिज्ञेयं सुमुखीसुमुखामृगाक्षीतिविशेष्यं नतूदाहरणांतरवटित्वादेवनित्यमीपप्राप्तेव पश्यव
दनाइत्यादौनिषेधः नन्वंगीइत्यादौनित्यमीप प्राणिस्थमद्रवंमूर्त्तंस्वांगस्यादविकारजं नत्रदृष्टमतःस्थश्चेत्तास्थितंतद्वद्युता
दृशि प्रत्युदाहरणानु सुमुखाशाला अप्राणिस्थत्वात् नवद्रुस्वेदाद्रवत्वात् स्वज्ञानात्रमूर्त्तत्वात् स्वशोथाविकारजत्वात् स्व
केशीस्वकेशावारथ्या अप्राणिस्थस्यप्राणिनिदृष्टत्वात् स्तनीस्तनावाप्रतिमा प्राणिवत् प्राणिसदृशस्थितत्वात् कदि
५० कारादक्तेरीवावक्तव्यः अंगुलीअंगुलिः धूलीधूलिः आजीआजिः अक्तेरितिविशेषणात् कृतिः भूतिः ऐचमन्वादेः मन्वा
देर्गणात्स्त्रियामीपप्रत्ययोभवति ऐचान्तादेशश्च मनुअग्निवृषाकपिपूतक्रतुकुसितकुसीदइत्ययं गणोमन्वादेरित्यादि
शब्देनगृह्यते मनोःस्त्रीमनायी अत्रअकारस्यऐकारेकृतेऐआय वकारान्तेमनोरीवामनावी अत्रओकारेकृतेअवआवव

© Dharmartha Trust J&K. Digitized by eGangotri

पाकपायीअभायीइत्यादिज्ञेयं पत्न्यादयः शब्दानिपात्यन्ते पत्नीयज्ञसंयोगएवसपत्नीसमानःपतिर्यस्याःसमानापत्नीइतिवा
सहादित्वात् सःनिपातनान्नादेशानुक्तसिद्धिः अन्तर्वत्नीगर्भिण्याअन्यत्रअन्तर्वतीपतिवत्नीसभर्तृका अन्यत्रपतिमतीनग
रीसखीत्यत्र ङ्यादिकाराद्विकल्पेन अशिश्वीशिशुहीना अईजरती प्राचीउदीचीमत्सीमानुषीसुरीअगस्तीअत्रयलोपः ईप्रव
निपात्यते पानिगृहीतीभार्यायांनिपात्यते एनीहरिणीअसिक्नीपलिक्नीपितामहीमातामहीस्थालीकुंडीगोणीकरवीकांडीकु
शीइत्यादयः पत्न्यादिषुद्रष्टव्याः दारशब्दः स्त्रीवाचीदारशब्दस्त्रीवाचित्वेपिस्त्रीप्रत्ययाभावेकारणमाह दारशब्दोनित्यंबहुवच
नान्तपुंलिंगः इतिअमीदाराइतिप्रयोगः वोर्गुणात् वाऊःगुणात्उकारान्तात्गुणवाचिनःशब्दात्स्त्रियामीप्रत्ययोभवति
सत्वेयद्यन्वेनिशतेअपैतिपृथकुयातिषुदृश्यते आधेयश्चक्रियाजश्चसोऽत्वप्रकृतिगुणाइति पट्वीपटुःतन्वीतनुः लघ्वीलघुः पांडु
रित्यादौन अतनुः उकारान्तात्ऊङ्प्रत्ययोभवति पंगुःवामोरूःकरभोरूः अतनुइतिनृजात्यप्राणिनजातेरकारोकाराद्ऊप्रत्ययः
नेहधनुः योपधरज्वादेश्च अध्वर्युः गोमायुःरज्जुःहनुरित्यादि यूनस्तिः युवनशब्दात्तिप्रत्ययोभवति नूणाइतिप्राप्तस्यापवादः
नाम्नोनोलोपसधौ युवतिः मतिशब्दवत् एभ्योनामत्वात्स्यादयः विभक्तिमतिरिक्तस्यनामत्वात्सिऔजसइत्यादिनाविभक्ति

© Dharmartha Trust J&K. Digitized by eGangotri

घोयोजपाः आवन्तादापृइतिसिलोपः ईवन्तान्हसेपःसेर्ल्लोपः इतिसल्लोपः पूर्ववद्रुपसुन्नेयं आवन्तानांगंगाशब्दवत् ई
वन्तानांनदीशब्दवत् युवतिशब्दस्यमतिशब्दवद्रुपंनेयं ॥०॥ एवंपुञ्जनरेन्द्रोविवादिमतिः पाथिनीपत्त्रः स्त्रीत्वप्रायान्यरूपयद
सांसारस्तनटीकायां ॥०॥ अथविभक्त्यर्थानिरूप्यन्ते स्त्रीप्रत्ययकथनानन्तरंविभक्त्यर्थानिरूप्यन्ते लिंगार्थमात्रेप्रथमा
धातुभवादि प्रत्ययोविभक्त्यादिस्तदन्यदर्थयुक्तंयच्छब्दरूपंतल्लिंगं अथवाशब्दप्रवृत्तिनिमित्तमितियावत् तस्यैवलिंग
स्यार्थस्तन्मात्रेकारकभेदशून्येवस्तुनि प्रथमाविभक्तिर्भवति लिंगादयोपिप्रथमार्थाइतिकेचित् आदिशब्दाल्लिंगपरिमा
णःवचनानितन्मतेलिंगंलिंगंस्त्रीपुंनपुंसकं श्रीकृष्णः ज्ञानंखारीद्रोणाःवचनंएकोद्वौबहवः अत्रप्रथमाकेचिदितिअनाम
ग्रहणात्तन्मतेअनादरं सूचयत् लिंगार्थेप्रथमेतिस्वमतोदाहरणं प्रथमसुपनाति नेतस्सवत्सोसि अत्रत्रिष्वपिपदेषु त
न्मात्रेलिंगार्थेप्रथमा रविविवजाजनेराजा इत्यादिसर्वं अन्योक्तिप्रथमेत्यस्योदाहरणं इदन्तुक्रियापदाद्यविवक्षितत्वेन
कथञ्चिल्लिंगार्थत्वमपितत्वं स्पष्टन्तुअन्योक्तेप्रथमायाएवोदाहरणं रविविवराजेनेवाजेति अत्रवाजनइत्याख्यातेन अ
५१ भिहितकर्त्रविवाजनशब्दमात्रेप्रथमा राजतिपुल्लिंकर्तृत्वेवचनन्तुनतत्सर्वंप्रथमार्थः एवमन्यत्रापिद्रष्टव्यं शेषास्तुकु

© Dharmartha Trust J&K. Digitized by eGangotri

मारीरोरुद्यते इतिक्रियाभिधायविन्यासितेनाख्यातेन अभिहिते कर्तृकारके कुमारीति प्रथमा स्त्रीलिंग एकवचनं प्रकटमे
व अतिशयेन भुनक्ति वा भुज्यते यत्र प्रथमा प्रयुज्यते तत्रापि अव स्थाति लिंगार्थस्य एकत्वे एकवचनं द्वित्वे द्विवचनं बहुत्वे बहुवचनं
मिति प्रकटयितुं क्रमादुदाहरति भूपाल इत्येकवचनं प्रागास्तं वामलक्ष्मणाविति प्रथमाया द्विवचनं सान्निमन्तः किंयन्तु इति
बहुवचनं सोकार्थमन्यदुदाहरणं कुमाराः शेरते सैरं इत्याख्यातेन विहिते कर्तृकारके पुंलिंगे बहुवचनं योरुदाहरणं पु
मपत्यं सुखेन शेते स्वापत्यं तु रोरुद्यते इति स्वभावोक्तिः जेतारीयन्ते च गीतमेभिरियन्ते राजाद्भिताः ॥ ० ॥ इति क्रियाशब्दयो
रुदाहरणे आमंत्रणे च लिंगार्थस्य सम्मुखीकरणे च प्रथमा विभक्तिर्भवति सम्बुद्धौ प्रथमायास्त्रिषु वचनेषु उदाहरणा
निदर्शयति भोसमुद्धर गोविन्द प्रसीद परमेश्वर गोविन्दपरमेश्वरेति एकवचनोदाहरणं कुमारौ स्वैरमासाथामिति द्विवच
नोदाहरणं त्वमर्थं भोस्तपस्विन इति बहुवचनोदाहरणं विविषये सं बुद्धिविषये हे शब्दवत् भो भगो अघो मः एते शब्दा निपात्य
ते धिविषये भोदराधश्च त्वमस्त्वभ शोऽस्मत्ते तुभ्यं नमः तविधं तेस्मतिर्यस्य अमौ अस्मजिः तस्य सम्बोधने अस्मते अथवा
नमोनीति अस्मत्त नमस्ते तुभ्यं नमः भो महाप्राज्ञ अधीस्व अघो स्वत्वस्मारं स्वस्य आत्मनो त्वस्मारं भवकं पापं यातय भवको घ

© Dharmartha Trust J&K. Digitized by eGangotri

स्मवोन्नत्रवडुभ्यमरः शेषाः कार्य्यकर्तृसाधनयो दानपात्रे विश्लेषावधौ सम्बन्ध आधारभावयोः शेषाः प्रथमापेक्षया द्वि-
तीयाद्या विभक्तयः क्रमादेष्वर्थेषु भवन्ति कार्य्ये द्वितीया कर्तृसाधनयोस्तृतीया दानपात्रे चतुर्थी विश्लेषावधौ पञ्चमी
सम्बन्धे षष्ठी आधारभावयोः सप्तमी कारकविभक्तय उपपदविभक्तयश्चेति विभक्तयो द्विविधा कारकविभक्तयो द्विवि-
धा उक्ता अनुक्तभेदेन तत्र कारकविभक्तिं दर्शयन्नाह कार्य्यं कर्मकारके उत्पाद्यं प्राप्यसंस्कार्यविकार्ये च द्वितीयाविभक्ति-
र्भवति इति कार्य्यं नाम कर्मकारकं चतुर्विधं उत्पाद्यं प्राप्यं संस्कार्यं विकार्यं चेति तत्र उत्पाद्यमाह उत्पाद्यं यथा घटं करोती-
ति अत्र घटं उत्पाद्यं कर्म प्राप्यमाह प्राप्यं यत्तु सिद्धमेव प्राप्यते यथा ग्रामं प्राप्नोतीति अत्र ग्रामः संस्कारो नाम कश्चिदतिशयः
तदर्हं संस्कार्यं यत्र क्रियया हि दृष्टाऽदृष्टा वा गुणा आधीयन्ते मलापकर्षो वा क्रियते यथा व्रीहीन् प्रोक्षयति यथा चेलं क्षालयति
यथा विकार्यं सोमं सुनोति अत्र पूर्वावस्थापरित्यागेनावस्थान्तरमापद्यते एवं चतुर्विधं कर्मकारकं कर्तुरीप्सिततमं अ-
५२ नीप्सितं तथा युक्तम् अपादानादिविशेषानर्हं अकथितं च तत्रापि द्वितीया विभक्तिर्भवत्येव उत्पाद्याद्युदाहरति कारकः
कटं करोतीत्यत्र उत्पाद्यं कर्म कटः रूपं पश्यति चाक्षुषः इत्यत्र रूपं कर्म संस्कार्यं दर्शनक्रियया रूपे ज्ञानतोऽशयः क्रिय

ते अन्येन मानाद्यावर्त्तितेराद्धं प्राप्नोति धर्म्मिष्ठः इत्यत्र राद्धं प्राप्यं कर्म्म सोमं सुनोति सोमपा इत्यत्र सोमो विकार्य्यं कर्म्म अनिप्सितस्य कर्म्मणो द्वेष्योपेक्षाभ्यां द्वैधमवगन्तव्यं यथा वृश्चिकं गृह्णाति ग्रामं गच्छन् तृणं स्पृशति इत्यादृष्टं तथा अपादानादिविशेषानर्हमकथितं च कर्म्म तत्रापि द्वितीया द्विकर्म्मकेषु धातुषु मुख्यकर्म्मयुक्तममुख्यं कर्म्म ज्ञेयं तेन द्विकर्म्मकाः दुहि याचि क्रुशादय इत्येवमादयः एवं कारकद्वितीयां निरूप्य उपपदद्वितीयां दर्शयति अभिसर्व्वतसोः कार्य्याधिगुपर्य्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते इति अभितस् सर्व्वतसोर्योगे द्वन्द्वादः श्रूयमानः प्रत्येकं सम्बध्यते अभिसर्व्वतसोश्चेति तयोर्योगे इति विग्रहः तथाधिकशब्दयोगे तथा आम्रेडितान्तेषु त्रिषु रूढेषु उपर्य्यादिषु त्रिषु उपरि अधि अधस् एतेषु त्रिषु द्वितीया कार्य्या प्रयोक्तव्या इत्यर्थः ततोऽन्यत्रापि समयानिकषाहाप्रतियोगेष्वपि यथाप्रयोगमन्यत्रापि दृश्यते उदाहरति ग्राममभितो नदी वहति अभितो ग्रामं सर्व्वतो नगरं अत्राभिसर्व्वतसोर्योगे द्वितीया धिकुं देवदत्तं धिकयागी पुरोहितमुपर्य्युपरि ग्राममध्यधि नगरमधोधः इत्यत्र आम्रेडितानामुपरि अधि अधस् एषां योगे द्वितीया ततोऽन्यत्रापि दृश्यते इत्युक्तत्वात् यथाप्रयोगमन्यत्रापि द्वितीयाऽवगन्तव्या समया ग्रामं निकषा ग्रामं हा स्वामिनं तथा लोकात् शिष्टप्रयोगादिति वक्ष्यमानत्वात् अन्यशास्त्रप्रपञ्चितान्युदाहरणानि स्वयमूह्या

© Dharmartha Trust J&K. Digitized by eGangotri

नित्ययाल्लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवइत्यादि तथागतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिप्रत्यय
व्यतिरिक्तस्थलेयः कर्त्ताणिजिप्रत्ययान्तानां कर्मभवति तथाशीङ् स्वप्ने ष्ठागतिनिवृत्तौ आसउपवेशने इत्येतेषामधिपूर्वाणामाधा
रेपिकर्म तथाउपअनुअधिआङ्पूर्वस्यवसतेः अभिनिपूर्वस्यविशतेर्वाधारःकर्मभवति इत्यादि ततोऽन्यत्रापिदृश्यते इत्येतद्ब
हुलादेवगन्तव्यं कालाध्वनोरिति कालाध्वनोर्नैरन्तर्ये गम्ये वाच्ये प्रतिकालवाचकात् अध्ववाचकाच्च द्वितीया मासमधीते मासपर्यन्तं
निरन्तरं अन्यथामासस्सकृद्द्विरधीते क्रोशंपर्वतः अत्राध्वनोर्नैरन्तर्ये तृतीयादर्शयति कर्तरि प्रधाने क्रियाश्रये साधने च कर्तरि
प्रधाने क्रियाश्रये कर्त्रर्थे तृतीयाभवति क्रियाश्रयत्वंकर्मादीनामपिभवति तन्निवृत्त्यर्थं प्रधानक्रियाश्रय इत्युक्तं केवलं
कर्त्रर्थेव तृतीयासाधनेच किन्नामसाधनं क्रियासिद्ध्युपकारकंसाधनं क्रियासिद्ध्युपसन्निहितत्वेन अप्रधारणात्वेन साधकतमं
करणमितियावत् यस्मिन् करणे तृतीयाविभक्तिर्भवति उदाहरति भिन्नः शरेण रामेण रावणो लोकरावणः कराग्रेणाद्रि
दीनैपि वानरैर्युधमे पुनः लोकान् रावयति क्रन्दयति लोकरावणः एवंविधोरावणः रामेण शरेणाभिन्नः अत्रभेदनक्रिया
५३ श्रयः प्रधानभूतः कर्ता रामस्तत्र तृतीया सिद्ध्युपकारत्वेन करणत्वात्साधनं शरस्तत्रापि तृतीया एवं वानरैरपि कर्तरि ति

© Dharmartha Trust J&K. Digitized by eGangotri

तीयाकरणं ग्रेणोति तृतीया वाणैः करणेणाविद्धोर्नो पिस पुनर्युद्धं तेकरालेति जातावेकवचनं चतुर्थीं ग्रेदर्शयति गत्यर्थानां धा
तूनामनध्ववाचकशब्दे परे कर्मणि वा चतुर्थी स्यात् ग्रामाय गछति ग्रामं गछति इह न अध्वनि शेषाकाद्यन्यादिना दानपात्रे चतुर्थी
विहिता तद्देवविद्रणोति दानपात्रे संप्रदानकारक इति सम्यकश्रेयो बुद्ध्या प्रदीयते यस्मै तद्दानपात्रं नाम संप्रदानकारकं तत्र च
तुर्थी वेदविदे गां ददाति अत्र गोदानस्य वेदविद् पात्रं राज्ञो दंडं ददाति रजकस्य वस्त्रं ददाति इत्यादौ सम्प्रदानकारकत्वाभावान्न
चतुर्थी चतुर्थीं दर्शयति पञ्चमीं दर्शयति विश्लेषावधाविति पूर्वोक्तया चेष्टया विश्लेषो विभागः संयोगपूर्वकः तत्र योऽवधिः यस्मा
द्विभागो जायते स चलतया अचलतया वा विवक्षितस्तत्र तस्मिन् विश्लेषावधौ अपादाने ऽपादानशब्दाभिधेये पञ्चमी विभक्तिर्भवति
चलतया विवक्षितस्य विश्लेषावधेरुदाहरणं धावतोऽश्वात्पतति अत्र अश्वेन संयुक्तस्य पुरुषस्य अश्वेन सह विश्लेषो भवति तत्राश्वोऽ
वधिस्तस्य चलत्वद्योतनार्थं धावत इति विशेषणं भूभृतोऽवतरति गंगा अत्र चलस्य विश्लेषावधेरुदाहरणं षष्ठीं दर्शयति सम्बन्धे षष्ठी
ति स्वम्यादौ सम्बन्धे लिंगार्थकारकादिव्यतिरिक्ता विभक्तेः षष्ठी विभक्तिर्भवति सम्बन्धस्तामयति प्रत्वेपि राजादेर्विशेषणादेव षष्ठी
तत्पुरुषादेरिति ज्ञातव्यं राज्ञोऽसौ पुरुषोऽस्ति यः पितृविलम्बयोजनं गुरूणां वचनं पथ्यं कवीनां रसवद्वचः इति क्रियायोगिनो

© Dharmartha Trust J&K. Digitized by eGangotri

मुख्याः पुरुषादयो राजादिभिर्विशेष्यन्ते सम्बन्धः स्वविशेषणाविशेष्यभावादि उच्यते राज्ञ इति एकत्वे राज्ञोरिति द्वित्वे गुरूणा
मिति बहुत्वे आधारभावं सप्तमीं दर्शयति अत्र चाधारे सप्तमी शब्दे अधिकरणमुच्यते क्रियाश्रयस्य कर्त्तुः कर्मणो वा विधृतं उदा
हरति कटे शेते कुमारो गोमा इत्यत्र एकदेशवृत्ति औपश्लेषिकमधिकरणं वटे गावः शेरते इति सामीप्यमधिकरणं तिले
षु विद्यते तैलं इति व्याप्तिवृत्ति औपश्लेषिकमधिकरणं हृदि ब्रह्मामृतं परं अभिव्यंगवृत्ति औपश्लेषिकमधिकरणमित्याधारे
सप्तमीं निरूपयति भावशब्दं व्याचष्टे भावः क्रियालक्षणं तत्रापि सप्तमीति सिद्धिः क्रियालक्षणं बोधनं भावः यथा वर्षणं प्रसिद्ध
क्रिया तया चौरगमनाप्रसिद्धक्रियालक्ष्यते यस्य क्रियया क्रियान्तरं लक्ष्यते स भाव इत्यर्थः तत्र सप्तमी भवति वर्षति देवे चौर
आगतः पतत्यंशुमालिनि पतितो रात्रिदिवसयोर्मेघस्य वर्षणक्रियया चौरगमनक्रियालक्षिता तथा अंशुमालिनः सूर्यस्य
तेनास्तमनेन अवारेः शत्रोः पतनं लक्षितमित्युभयक्रियालक्षणे सप्तमी शेषाः कार्यं कर्तृसाधनइत्यादिवत् उपपदविभक्तिं
५४ दर्शयति विनासहनमस्स्वस्त्यन्येनिर्द्धारणसाम्यादितिसूत्रं एतैरपि योगे द्वितीयाद्याविभक्तयो भवन्ति आदिशब्दस्य प्रत्येकं सम
म्बन्धः तेन विनादिभिर्योगे द्वितीया सहादिभिस्तृतीया नमआदिभिश्चतुर्थी अन्ये इत्यादिभिः पञ्चमी निर्द्धारणे षष्ठी सप्तम्या

© Dharmartha Trust J&K. Digitized by eGangotri

दितिः सप्तमी इतियोज्यं उदाहरति विनापापंसर्वं फलति विना शब्दस्य योगे पापमिति द्वितीया अन्तरेणाद्विणीकिंजीवितेनअद्विणी
द्वितीयानेत्राभ्यांविनाकिंजीवितेनइत्यर्थः अन्तरात्वांमांमधु गवममध्येइत्यर्थः अन्तराशब्दोमध्यवचनः विनाअन्तरेणाअन्तराइ
त्यादिपदात्साह्यंसहादियोगेद्वितीयांदर्शयति सहशब्दस्तुल्ययोगितायां विद्यमानतायांश्चविद्यते तुल्ययोगितायाचसहशिष्येणा
गतोगुरुः इतिक्रियातुल्ययोगिता संदेहवदशभिः पुत्रैर्भारंवहति गर्दभीइत्यत्रविद्यमानतायांसहार्थः विद्यमानेरपि दशभिःपुत्रैरि
त्यर्थः सदृशशब्देत्रीभेत्रेशातुल्यार्थेस्तुल्योपमानिरिक्तेस्तृतीयाषष्ठीच राज्ञस्तुल्यः राज्ञातुल्यः साकंसार्द्धंकृतंप्रभृतयः सहादयः साकं
नयनाभ्यांकृष्णादत्ताः सार्द्धधनिभिर्हृतः साधुःकृतंमनावतोकेनइत्यादि नमआदिभिर्योगेचतुर्थीदर्शयति नमोनारायणायनमोयो
गेनारायणेतिचतुर्थीएवंस्वस्तिराज्ञेसोमायस्वाहा पितृभ्यःस्वधा अलंमल्लोमल्लाय अत्रअलंशब्दःसामर्थ्ये अन्यत्रतुअलंविवादेन
वषडिन्द्राय अभ्यंयेन्टशायमन्यंने फलेभ्योयाति फलान्याहर्तुंयातीत्यर्थः विप्रायप्रतिशृणोति गांप्रतिशृणोति प्रतिजानीते अनुगृ
णातीत्यादौवातायकपिलिकाविद्युतः शतायक्रीतः यथाप्रयोगमादिशब्दात्ज्ञेयं अन्तेइत्यादियोगेपञ्चमी अन्तेज्ञानान्नमुक्तिः
अन्योगृहाद्विहारः भिन्नोग्रामात् इतरोग्रामात् आरात्ग्रामात् आवात्दूरेसमीपेवा पूर्वोग्रामात् उत्तरोग्रामात् प्राक्उदक्वा

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रामात् दक्षिणाद्धिग्रामात् जन्मनः प्रारभ्य जन्म प्रभृति धर्म्मं चरति गृहाद्बहिः लोकान्युक्तः कृष्णान्युक्तः इत्यादिशब्दान्तरेयं
निर्द्धारणादौ षष्ठी निर्द्धारणं विवृणोति क्रियागुणजातिभिः समुदायात् पृथक्करणं अत्र षष्ठी क्रियापराणां भगवदाराधकः
श्रेष्ठः इति अत्र क्रियापरसमुदायात् भगवदाराधकस्यैव सिद्धेन पृथक्करणं अतः क्रियापराणामिति समुदाये षष्ठी गवां कृष्णा
सम्पन्नक्षीरतमा अत्र गुणेन गोसमुदाये षष्ठी एषां क्षत्रियाः शूरतमाः अत्र जातिवाचकसमुदायात् पृथक्करणं स्मृतौ
चकारार्थे च षष्ठी मातुः स्मरति चकारात् जगन्नाथीष्ठे प्राधान्यस्य तु मातरं स्मरति हेतौ तृतीयापञ्चमी च वक्तव्याः हेतौ साधके तृती
यापञ्चम्यौ वक्तव्ये अनित्यः शब्दः कृतकत्वेन कृतकत्वात् भयहेतौ च भयस्य हेतुः कारणं तत्र पञ्चमी चौराद्बिभेति व्याघ्रात् त्रस्यति
विद्युत्पातात् शङ्कितः षष्ठी हेतुप्रयोगे हेतौ प्रयोगे षष्ठी कस्य हेतोः अनेन प्रकारेण द्वितीयं तद्धावल्लणं तृतीया शिष्यं पुत्रं शाप
यति पुत्रं तया पश्यतीत्यर्थः विकृताङ्गात् तृतीया विकारस्तत्पुनरधिकारभ्यां द्विविधः अक्ष्णा काणः पादेन खञ्जः इत्यादौ न्यूनेनाङ्गे
५५ न विकारः मुखेन त्रिलोचनः वपुषा चतुर्भुजः इत्यादौ आधिक्येन विकारः जनिकर्त्तुः प्रकृतिः जनिर्जननं जननेः कर्त्ता जनिकर्त्ता तस्य
प्रकृतिर्मूलकारणं तदेव विवृणोति जायमानस्य कार्य्यस्योपादानं मूलकारणम् अपादानसंज्ञं भवति तत्रापादाने पञ्चमी यस्मात्

© Dharmartha Trust J&K. Digitized by eGangotri

जाः प्रजायन्तेनेन हूणेति यत्र जनिः प्रतिकर्तृभूतानां जायमानानां प्रजानां प्रकृत्वाच्य मुपादानं तस्मात् पञ्चमी आङादियोगे च
आङादियोगे च पञ्चमी आपाटलिपुत्राद्वृष्टो देवः आपाटलिपुत्रं नाम नगरं मर्यादीकृत्याभिव्याप्य वा पृथक्क्रियते एवंप्रकार
क्रियाः कृतमाहृतिष्ठन्ति यत्नजात्या समुदायात् पृथक्करणं आदिशब्दात् कश्चित् प्राधान्ये कर्मणि षष्ठी चौरस्य रुजति रोगः हिंसा
यां चौरस्य उज्जासयति निहन्ति प्रहन्ति प्रणिहन्ति नाटयति क्राथयति पिनष्टि वा सर्पिषो नाथते इत्यादावपि आदिशब्दात् ज्ञेयं
स्वाम्यादिभिश्च योगे सप्तमी गवां स्वामी स्वाम्यादिभिश्चेति चकारात् षष्ठी एवं गोषु ईश्वरः गवामीश्वरः गोषु अधिपतिः गवाम
धिपतिः एवं दायादसाक्षिप्रतिभूप्रसूतेर्योगे सप्तमी षष्ठी च ज्ञेया आसेवायामायुक्तकुशलाभ्यां योगे च आयुक्तकुशलो व्याख्याने व्या
ख्यानस्य वा इत्यादिशब्दात् ज्ञेयं कर्तृकार्ययोः कृदादौ कृति षष्ठी कर्तरि कार्ये कर्मणि षष्ठी भवति कादिवर्जिते कृदन्ते शब्दे प्र
युज्यमाने ग्रामस्य कृतिः इह ग्रामः कृतेः कर्त्ता न तत्र षष्ठी भवति तस्य प्रदर्शनार्थं श्रवणात् कर्म कृद्योगलक्षणा षष्ठी उभयत्र ज्ञेया
कादियोगे तु मया कृतं ग्रामं प्राप्तः आदिशब्दात् ग्राममगच्छत् धर्मं भजमानः शुल्कं पेचिवान् पुत्रं च कामाः देवं दिदृक्षुः आ
मानसमलंकरिष्णुः दैत्यान् घातुकः लक्ष्मीकामुकः इत्यव्ययनिषेधः कृतवान् अन्नं बुभुक्षा ग्रामं गन्तुमुपक्रमति इत्यादौ कादियो

© Dharmartha Trust J&K. Digitized by eGangotri

गात्रषष्ठी स्मरतेः कार्य्ये च स्मरत्यर्थे प्रयुज्यमाने कार्य्ये कर्म्मणि षष्ठी भवति इत्यर्थः आदिशब्दादपपरीवर्ज्जने अपथ्यामात इत्यादिज्ञे
यं तादर्थ्ये चतुर्थी वाच्या सोऽर्थो यस्य तत्तदर्थं तस्य भावस्तादर्थ्यं संयमाय श्रुतं धत्ते नरो धर्म्माय संयमं धर्म्मं मोक्षाय मेधावी धनं दा
नाय भुक्तये इति नरः संयमार्थं श्रुतं धर्म्मार्थं संयमं मोक्षार्थं धर्म्मं दानार्थं भुक्त्यर्थं धनं धत्ते इत्यन्वयः क्रुधादियोगे च क्रुधद्रुहे
र्ष्योऽसूया श्लाघह्नुङ्स्थाशपरुचे क्रुधादयः तथा रुच्यर्थधातुयोगे प्रियमाणाच्चतुर्थी सोपसर्गक्रुधद्रुहयोर्योगे द्वितीयेति वक्त
व्यम् ज्ञातव्यं उदाहरणानि क्रुधाय क्रुध्यति मित्राय द्रुह्यति सोपसर्गयोश्च क्रूरमभिक्रुध्यति मित्रमभिद्रुह्यति गुणवतेऽसू
यति ईर्ष्यति गोपी स्वाय कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा भक्त्या पथारयति मोदते हरिः माधवस्पृहयते राज्ञे रोचते विज
य इति यथाप्रयोगद्रष्टव्यं ल्यब्लोपे पञ्चमी वक्तव्या ल्यब्लोपे कर्म्मण्यधिकरणे च पञ्चमी हर्म्यात् प्रेक्षते हर्म्यमारुह्य प्रेक्ष
ते आसनात्प्रेक्षते आसनमारुह्य प्रेक्षत इत्यर्थः निमित्तात् कर्म्मसंयोगे सप्तमी च वक्तव्याः निमित्तात् प्रयोजनवाचिनः श
ब्दात् सप्तमी कर्म्मसंयोगे सति वक्तव्या चर्म्मणि चर्म्मनिमित्तं द्वीपिनं व्याघ्रं हन्ति दन्तयोर्हन्ति कुञ्जरं दन्तयोर्निमित्तं कुञ्जरं गजं
हन्ति केशेषु वालेषु निमित्तेषु चमरीं हन्ति सीम्नि पुष्कलको हतः सीमायां निमित्तभूतायां पुष्कलको नाम क्षुद्रग्रामाधिपतिर्हतः

© Dharmartha Trust J&K. Digitized by eGangotri

विषयेनर्केचतुरः अत्रतर्केक्रियाश्रयत्वाभावान् नामाधिकरणमिति विषयेसप्तमी षष्ठीसप्तम्यौचानादरे अनादरे द्योत्येष
ष्ठीसप्तम्यौभवतः मातापित्रोःरुदतोःप्रव्रजतिपुत्रः मातापित्रोरितिषष्ठीसप्तम्योरेकमेवोदाहरणं बहुषुसाधुस्वनिवारयत्स्वपि
स्वयमार्य्योयातिसाधुमार्गेण बहुषुसाधुषुनिवारयत्स्वपिस्वयमनार्य्योयात्यसाधुमार्गेणइत्यत्रापिचगर्वादनादरः अन्यत्रज्ञाना
दितिविवेकः इनवेक्तान्तेकर्म्मण्यपिसप्तमी अधीतीव्याकरणेकर्मनियद्धा कुलालेनकृतस्यकटः कुलालेनकृतोघटइत्यर्थः व
र्त्तमानेकर्मणिनिषष्ठी अन्योक्तेप्रथमा यदितियदाद्दं कार्य्यत्वादिकंकर्म्मकारकादिकमन्येनाख्यातेनकृतान्चकारादितद्धितस
मासाभ्यांउक्तंभवति तदाप्रथमाप्रयोक्तव्या घटःक्रियतेइति आख्यातेनाभिहितेकर्म्मणिप्रथमापटःकार्य्यइत्यत्रकृताव्ययाप्रत्य
येन उक्तेकर्म्मणिपटःप्रथमाः राजाराजतेइत्यत्रतेआख्यातेनकर्त्तर्युक्तेराजेतिप्रथमा कुंकुमेनरक्तंवस्त्रंकौंकुममितितद्धिते
नाभिहितेकर्म्मणिप्रथमा प्राप्तमुदकंग्रामंप्राप्तोदकग्रामइत्यत्रसमासेनाभिहितेप्रथमाइत्यादिज्ञेयं छन्दसिस्यादिःसर्वत्र छन्द
सिसर्वत्रकारकेसर्वत्रविभक्तिर्भवति दध्नाजुहोतिदधिजुहोतिइत्यर्थः पुनस्तुब्रह्मणास्यातिः इतिब्रह्मणास्यातिंपुनस्त्विति द्वितीया
र्थेप्रथमा व्रजतीर्विरेजुरितिव्रजन्त्योगोप्योविरेजुरिति प्रथमार्थेद्वितीया इत्युदारमतिनामसरस्वतीसूत्रविहृतंवितन्वता॥ ॰०॰॥

© Dharmartha Trust J&K. Digitized by eGangotri

57

श्रीपुञ्जराजविभुना अत्र विस्तरं कारकप्रकरणानि निरूपितं ॥ ॐ ॥ ॐ ॥ अथ विभक्तीनामर्थं वक्तुं निरूप्य अनन्तरं यु
थेव ङ्गी याया विभक्तयस्तद्विशिष्टानां समासो निरूप्यते इति समासनिरूपणं प्रतिजानीते समासश्चान्वयेनाम्नां नाम्नैव नामा
नि च आदेश्च द्वन्द्वे नामानि तेषां नाम्नां क्वचित्तद्वयोः क्वचिद्बहूनां नाम्नामन्वययोग्यत्वे सत्येव समासो भवति एवकारात्तद्विनापि यत्राऽ
न्वययोग्यत्वे सत्येव समासो भवति गतो भार्य्या पुरुषस्येत्यादौ विपरीतादये समासो नास्ति अथवा देवदत्तस्य भार्य्या पुरुषस्य वस्त्रमि
त्यादि इत्यत्र मध्यवर्त्तिनो भार्य्या पुरुषशब्दयोः परस्परमन्वय योग्यताभावान्न समासः समासश्चान्वयेनाम्नामित्यत्र नामाख्यातोप
ख्यातोपसर्गनिपाताइत्यादिषु च प्रसिद्धं नामपदमेव नामशब्देनोच्यते अविभक्तिनामेति नन्वत्र शाब्दबोधे मतिः समासे क्रियमाणो
समासप्रत्यययोरिति सूत्रं व्यर्थं स्यात् अत्र एवैतन्न शंकानिवारयन्नर्थं वद्विभक्तिविशिष्टानां पदानां समासो निरूप्यत इति प्रतिजानीवा
५७ न वृत्तिकारः तस्मादत्र पदपर्यायो नामशब्दो वेदितव्यः समासः षड्विधस्तं दर्शयति अव्ययीभावस्तत्पुरुषो द्वन्द्वो बहुव्रीहिः
कर्म्मधारयो द्विगुश्चेति लक्षणानि दर्शयति पूर्वपदप्रधानोऽव्ययीभाव इति पूर्वेऽव्ययेऽव्ययीभाव इति पूर्वेऽव्ययेऽव्ययीभाव इत्यत्र
अव्यये पूर्वे प्रधाने तेन पूर्ववर्त्तिनि अव्ययीभाव इति सूत्रार्थः तेनन ब्राह्मणाः अब्राह्मणाः इत्यादौ अव्ययपूर्वकत्वेपि अप्राधान्यान्वा

© Dharmartha Trust J&K. Digitized by eGangotri

व्ययीभावत्वं द्विगुतत्पुरुषौ परपदप्रधानौ उत्तरपदस्य प्रधान्यात्तत्पुरुषः परपदप्रधानः द्विगुस्तु समाहारार्थे च तद्धितार्थे च उ
त्तरपदस्य प्रधान्यं दृष्टमिति स्वसंकेतात्समाहारलक्षणस्य उत्तरपदस्य प्रधान्यविवक्षायां दशानां ग्रामाणां समाहारो दशग्रामी न्या
दिविशेषणाशङ्कयोः षष्ठ्यन्तयोः प्रयोगात् समाहारलक्षणस्य परपदस्यार्थस्यैव प्रधान्यमित्याशयेन द्विगोरपि प्रधानता भवतीति
योज्यं द्वन्द्वकर्मधारयौ चोभयपदप्रधानौ बहुव्रीहिरन्यपदप्रधानः तस्य क्रियाभिसम्बन्धात् इत्येतत्सर्वं त्वाव्ययीभावादौ हेतुत्वेन
संबध्यते क्रियायोगत्वेन पूर्वादिपदानां प्रधान्य इत्यर्थः निषादानां स्थपतिरिति तत्पुरुषः निषादश्चासौ स्थपतिश्चेति कर्मधारय इ
त्यादौ तत्पुरुषकर्मधारयसमवायेऽकर्मधारय एव ग्राह्यः इत्यत आह अन्यपदप्रधानो बलवान् इति ननु विभक्तान्येव पदानि
प्रयोक्तव्यानि किं समासेनेत्यत आह ऐकपद्यमैकस्वर्यमैकक्रियत्वश्च समासस्य प्रयोजनं अनेकपदानामैकपद्यं अनेकस्वराणामै
कस्वर्यं यथास्त्रियमधिकृत्य भवतीति विभागोच्चारणप्रयत्नं गौरवं स्यात्समासे प्रकृते उच्चारणप्रयत्नलाघवं स्यात् इदमेकं प्रयोज
नं ऐकपद्यात् शरवणादौ णत्वमपि प्रयोजनं तथा वैदिकक्रियाप्रसिद्ध एव समासमाधुदात्तादिरैकस्वर्यश्च प्रयोजनं अधिस्त्रि इति
स्त्रियांमित्स्त्रीशब्दाद्द्वितीयैकवचनं एवं सति स्त्रियमधिकृत्य भवतीति विग्रहे विग्रहशब्देन किमुच्यत इत्याह अन्वययोग्यमर्थं समर्प्प

© Dharmartha Trust J&K. Digitized by eGangotri

यतिदर्शयति एवंविधपदसमुदायो विग्रहो वाक्यमिति यावत् विग्रहशब्दपर्यायास्तु वाक्यत्वे पर्यवसन्नीत्यर्थः ॥ ० ॥ पूर्वे ऽव्यये
ऽव्ययीभावः अव्ययपूर्वपदे सति योऽन्वयः सपदसम्बन्धः सोऽव्ययीभावसंज्ञको भवति अनेन सूत्रेण अव्ययीभावसमासविशेषसंज्ञा
विहिता समासस्त्वाल्वय नाम्नामित्यधिकारसूत्रात् समाससंज्ञायां समासप्रत्यययोः स्व समासे वर्त्तमानायाविभक्तेः प्रत्यये च परे
लुक् भवति इत्यमोलुकि कृते कृत्तद्धितसमासाः श्चेति नामसंज्ञायां तस्मात् सि औ जस् इत्यादिना स्यादिविभक्तिः अधिस्त्री सिद्धाति
स्थिते सनपुंसकं सइत्यव्ययीभावो नपुंसकलिङ्गो भवति प्रयोजनमाह सनपुंसकत्वात् ह्रस्वत्वमिति सूत्रेण ह्रस्वत्वं अव्ययीभा
वात् अव्ययीभावात् परस्य विभक्तेः लुक् भवति अधिस्त्रि इति सिद्धं गृहकार्य्यमित्यनेन सप्तम्यर्थे अव्ययीभाव इति दर्शितं स्त्र्याधारं गृ
हकार्यं इत्यर्थः गाथमति क्रान्तमतिरिकुलं नावमति क्रान्तमतिस्वजलं इति विग्रहे समासप्रत्यययोरिति विभक्ति लुकि कृते नाम
५८ संज्ञायां सोकृते सनपुंसकमिति नपुंसकत्वे ह्रस्वादेशे सत्यराणामिति इकारोकारो एवं च आविति इकारे कृते च अव्ययीभावादिति
विभक्तिलुकि इति रूपसिद्धिः यथाऽसादृश्ये यथाशब्दोऽसादृश्ये वर्त्तमानः समस्यते यथाशब्द एव सादृश्येन समस्यते अन्ये सादृश्ये
पि समस्यन्त इति यथाशक्त्याः सख्याः समासः अत्राव्ययीभावः शक्तिमनतीति क्रम्य कर्म्म करोतीति विग्रहे पूर्ववत्सर्वसमासे

© Dharmartha Trust J&K. Digitized by eGangotri

कुम्भे यथा शक्तीति सिध्यति अतोऽमनन्तः अनः अम स्यात्तः अन्तात् अव्ययीभावात् परासां विभक्तीनां अम् भवति अन्तं वर्जयि
त्वा अतो ग्रहणं पञ्चम्या उपलक्षणार्थं पञ्चमीं वर्जयित्वेत्यर्थः कुम्भस्य समीपम् इति विग्रहे समीपार्थे उपशब्दोऽव्ययं समस्यते सोऽव्य
यीभावसंज्ञकः समासो भवति समासप्रत्यययोरिति कुम्भशब्दात् परस्य षष्ठ्येकवचनस्य लुकि कृते नामसंज्ञायां सि सेर्मादेशे उपकु
म्भं द्वितीयैकवचनेऽप्येवं वा टाङ्योः टाङि इत्येतयोर्वा अम् भवति उपकुम्भेन कृतं उपकुम्भं कृतं कुम्भस्य समीपेन कश्चिद्देनेन
कृतमित्यर्थः उपकुम्भं देहि चतुर्थी कुम्भस्य समीपे वर्तमानाय देहीत्यर्थः एवं सर्वं वर्जयेत् उपकुम्भादानय अत्र अमनतेऽस्तु केनाऽ
अम न भवति नतोऽम इति उक्तत्वेषां सर्वविभक्तिषु प्राप्ते न्यमा प्रथमसे लुग्व्याप्तिर्विहिता सद्यन्तरं पञ्चं वर्जयित्वेति निषे
धसामर्थ्यादपि विभक्तिलुक् निरस्तः यदि लुक् न भविष्यत् तर्हि कथं अमनिषेधं अकरिष्यत् तस्मादुपकुम्भादित्यत्र न लुक् इति भावः.
उपकुम्भं देशः योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं चेति चत्वारोऽयथार्थाः योग्यतायां यथानुरूपं अस्य दानं वीप्सायां प्रतिप
द्य यथा वृद्धं ब्राह्मणानामन्वयस्य पदार्थानतिवृत्तौ शक्तिमनतिक्रम्य करोति यथाशक्ति इत्यत्र षष्ठी उपकुम्भं उपकुम्भेन निषेधानिसप्त
मी वा टाङ्योरिति विकल्पेन अम् अवधारणार्थे यावच्च यावदमत्रास्तावदश्वान् अमन्त्रयस्वेति विग्रहे यावदमत्रं ब्राह्मणानामन्त्रयस्व

© Dharmartha Trust J&K. Digitized by eGangotri

20 [illegible]

पूर्वपदेऽव्ययेऽव्ययीभावः मक्षिकाणामभावइतिविग्रहे मक्षिकाशब्दात्षष्ठ्येकवचनस्यलुक्[illegible] पूर्व
कस्यनपुंसकह्रस्वादेशः अतोऽमनतः इतिअमिकृतेनिर्मक्षिकमितिसिद्धिः. [illegible]धात्[illegible]याथ[illegible]निय[illegible] पूर्वयोगापद[illegible]
कृत्यवीप्साशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्यताहस्यादयोऽपि [illegible] अव्ययीभावस्यत्वंयथा [illegible]
२.१ [illegible] पूर्वेऽव्ययेऽव्ययीभावः [illegible]इतिपदस्यानुवृत्त्या [illegible] पूर्वपदमव्ययीभावाख्याने
तथा [illegible]समासोभवतिपाऽव्ययेऽव्ययैः [illegible] गंगायाःपतितंगंगंग्राममसमस्तपदे [illegible] ग्रामं [illegible]
इतिविग्रहेसमासप्रत्ययोविभक्तिलोपः नामसंज्ञायांस्यादिः ग्रामं [illegible] ग्रामंयाप्तः [illegible]
पदं [illegible] पूर्वपदं [illegible] पूर्वपदं [illegible]
२ [illegible] पूर्वपदं [illegible]
[illegible]इतिविग्रहे [illegible] पूर्वे [illegible]
[illegible] पूर्वे [illegible] इतिवाक्य [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

सं. २३